# Yamaproktah Mahadeva Stava

# યમપ્રોક્તઃ મહાદેવસ્તવઃ

## Document Information

Text title : Yamaproktah Mahadeva Stava

File name : yamaproktaHmahAdevastavaH.itx

Category : shiva, shivarahasya, stava

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 73-83||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# યમપ્રોક્તઃ મહાદેવસ્તવઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
સ એવ મુક્તિકાન્તાયાઃ કાન્ત ઇત્યુચ્યતે બુધૈઃ ।
મહાદેવસમોદેવો ન ભૂતો ન ભવિષ્યતિ ॥ ૭૩॥

મનુષ્યેષુ યથાશ્રેષ્ઠો બ્રાહ્મણો વેદવિત્તમઃ ।
તથૈવ શ્રીમહાદેવો દેવેષુ શ્રેષ્ઠ ઉચ્યતે ॥ ૭૪॥

ચતુષ્પદેષુ ગૌઃ શ્રેષ્ઠા યથા સ્પૃષ્ટાઘનાશિની ।
તથૈવ શ્રીમહાદેવો દેવેષુ શ્રેષ્ઠ ઉચ્યતે ॥ ૭૫॥

સાગરેષુ યથા શ્રેષ્ઠઃ ક્ષીરાબ્ધિરિતિ વિશ્રુતઃ ।
તથૈવ શ્રીમહાદેવો દેવેષુ શ્રેષ્ઠ ઉચ્યતે ॥ ૭૬॥

મુક્તિક્ષેત્રેષુ સર્વેષુ કાશી શ્રેષ્ઠા યથા શ્રુતા ।
તથૈવ શ્રીમહાદેવો દેવેષુ શ્રેષ્ઠ ઉચ્યતે ॥ ૭૭॥

યથાચલેષુ સર્વેષુ કૈલાસઃ શ્રેષ્ઠ ઉચ્યતે ।
તથૈવ શ્રીમહાદેવો દેવેષુ શ્રેષ્ઠ ઉચ્યતે ॥ ૭૮॥

શમ્ભુરેવ કૃપામ્ભોધિરારાધ્યં દૈવતં મમ ।
એતાદૃશં મહદ્ભાગ્યં મમ ભૂરિતપઃ ફલમ્ ॥ ૭૯॥

શામ્ભવા એવ સુભગાઃ સુભગાશમ્ભુભાવના ।
યયા ભાવનયા સાક્ષાન્મોક્ષલક્ષ્મીરવાપ્યતે ॥ ૮૦॥

અનન્યશરણા નિત્યં યેઽર્ચયન્તિ મહેશ્વરમ્ ।
તૈરેવ સર્વસૌખ્યાનિ પ્રાપ્તવ્યાનિ ન સંશયઃ ॥ ૮૧॥

ઉદ્ધૂલ્ય ભસ્મનાઙ્ગાનિ સર્વદા વિધિપૂર્વકમ્ ।
યઃ શિવારાધનં કુર્યા સ ધન્ય ઇતિ ગીયતે ॥ ૮૨॥

યસ્તુ નિત્યં પ્રયત્નેન શિવસ્મરણમાદરાત્ ।

કરોતિ ભૂતિપૂતાઙ્ગઃ સ ધન્ય ઇતિ ગીયતે ॥ ૮૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તઃ મહાદેવસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૭૩-૮૩॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 73-83..

Proofread by Ruma Dewan

---

*Yamaproktah Mahadeva Stava*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*